# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा- शास्त्रितृतीयवर्षम्(SEM- ६) | प्रश्नपत्रम् – 6 | गुणाः - ७० |
| विषय: - नव्यव्याकरणम् | कोड – CC.3.6.12 | समय: - ११ त: ०२ |
| दिनाङ्क: - ०४-०४-२०१९ | सन्दर्भग्रन्थः – वैयाकरणभूषणसारः महाभाष्यञ्च \| | |

**प्रथमान्विति:**

**प्रश्नः-१ कयोरपि द्वयोरुत्तरे लेख्ये |** १०

(१) “न धातुलोप आर्धधातुके” इत्यत्र आर्धधातुकग्रहणं लोपविशेषणम् आहोस्विद् गुणवृद्धिविशेषणम् इति भाष्यदिशा चर्चा विधेया |

(२) ‘यङ्यक्क्यलोपे प्रतिषेधः’ इति वार्त्तिकं सप्रसङ्गं सोदाहरणं च व्याख्येयम् |

(३) क्ङिति प्रतिषेधे तन्निमित्तग्रहणस्य प्रयोजनं स्पष्टयत |

**प्रश्न:२** “क्ङिति च” इति सूत्रं यथाभाष्यं व्याख्येयम् | १०

अथवा

“मुखनासिकावचनोऽनुनासिकः” इति सूत्रं भाष्यानुसारं व्याख्येयम् |

**द्वितीयान्विति:**

**प्रश्न:-३ कयोरपि द्वयोरुत्तरे लेख्ये |** १०

(१) “क्तक्तवतू निष्ठा “ इति सूत्रं भाष्यदिशा व्याख्येयम् |

(२) ‘उभयगतिरिह भवति’ इति परिभाषायाः आशयं भाष्यदिशा स्पष्टीकुरुत |

(३) “ष्णान्ता: षट्” इति सूत्रं भाष्यानुसारं व्याख्येयम् |

**प्रश्न:-४** “ईदूदेद्द्विवचनं प्रगृह्यम्” इति सूत्रस्य विषये भाष्यानुसारिणी चर्चा विधेया | १०

अथवा

“अदसो मात्” इति सूत्रस्य भाष्यानुसारं व्याख्या विधेया |

**तृतीयान्विति:**

| | | |
|---|---|---|
| **प्रश्नः-५** | **कयो: अपि द्वयो: उत्तरे लेख्ये \|** | १० |
| (१) | ग्राह्यत्वं ग्राह्यकत्वं च द्वे शक्ती तेजसो यथा \|<br>तथैव सर्व शब्दानामेते पृथगवस्थिते \|\| इति कारिकां व्याख्यात \| | |
| (२) | शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा \|<br>नो चेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते \|\| इति कारिकां व्याख्यात \| | |
| (३) | 'कारकमपि नामार्थः' इति ग्रन्थोक्तरीत्या प्रतिपादयत \| | |

| | | |
|---|---|---|
| **प्रश्नः-६** | नामार्था: कति ? के च ते ? इति अधीत ग्रन्थानुसारं वर्णयत \|<br>अथवा<br>'एकम् इत्यस्य चायमभिप्रायः- शक्तिज्ञाने च विषयतयाऽवच्छेदिका जातिरेकैवेति' अस्याः शास्त्रपङ्क्ते: सोपपत्तिकं व्याख्यानं विधेयम् \| | १० |

| | | |
|---|---|---|
| **प्रश्नः-७** | **निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं लेख्यम्।** | १० |
| (१) | 'लविता' इत्यत्र कः प्रत्यय: ? | |
| (२) | "क्ङिति च" इति सूत्रं कयोः निषेधं शास्ति ? | |
| (३) | 'उपेद्धः' इत्यत्र को धातु: ? | |
| (४) | 'क्नोपयति' इत्यत्र को धातु: ? | |
| (५) | 'मुखनासिकावचनोऽनुनासिक:" इत्यत्र मुखग्रहणं केन न्यायेन आकर्तुं शक्यम् ? | |
| (६) | शब्दान्तरस्य प्राप्नुवन् विधिः कीदृशो भवति ? | |
| (७) | "ईदुदेद्विवचनं प्रगृह्यम्" सूत्रोऽपरि भाष्ये प्रदर्शितेषु चतुर्षु पक्षेषु कः सिद्धान्तः पक्ष: ? | |
| (८) | "अदसो मात्" सूत्रेण का संज्ञा भवति ? | |
| (९) | आद्यन्तवदेकस्मिन् इत्यस्य स्थाने भाष्ये का परिभाषा स्वीकृता ? | |
| (१०) | ईषदर्थे, क्रियायोगे, मर्यादायाम् अभिविधौ च 'आ' कीदृशो भवति ? | |
| (११) | को नाम नागृहीतविशेषणन्यायः ? | |
| (१२) | किन्नाम नपुंसकत्वम् ? | |
| (१३) | चतुष्कं नामार्थः इति मते के चत्वारः नामार्थत्वेन गण्यन्ते ? | |
| (१४) | शास्त्रकारै: प्रत्ययानाम् अर्थद्योतकता अङ्गीक्रियते अर्थवाचकता वा ? | |
| (१५) | वैयाकरणानां मते शब्दः शब्दस्य वाच्यार्थः लक्ष्यार्थो वा ? | |